प्राणचारं हंसश्चरेत् । किमवधीत्याह 'आयुर्वै सर्वदेहिनाम्' यावज्जीवमित्यर्थः ॥ ११९ ॥

अथ प्रबुद्धस्य नित्यमेव संक्रान्तिदक्षिणायनोत्तरायणादिपुण्यकाललाभात्तत्तत्सिद्धिसमासादनमनायासेन जायते । तदेतदाह

ऐहिकामुष्मिकी सिद्धि-
रधमा मध्यमोत्तमा ।

साधकानामत्रस्थानां भवति ॥

उपसंहरति

अयनद्वयमाख्यातं

अत्र च मकरादिषु द्वादशसु कार्यस्य गर्भत्वं, प्रोद्बुभूषिष्यत्त्वं, प्रोद्बुभूषत्त्वम्, उद्भविष्यत्त्वम्, उद्भवप्रारम्भः, उद्भवत्त्वं, जन्म, सत्ता, परिणतिः, वृद्धिः, ह्रासः, क्षयश्च क्रमाद्भवति। अतोऽत्र जपादिक्रियैतादृगेव फलं सूते,–इति गुरवोऽभ्यधुः ॥

यदा तु प्राणापानयातायातपरिहारेण हृदि द्वादशान्ते च विश्रान्तिः क्रियते, तदा

१ ख० पु० यावज्जीवितमिति पाठः ।

अब्दादिजीवितं च तत्परीक्षाकालात्प्रभृति गणयेदित्याह

यदारभ्य निरूप्येत
प्राणे वै कालमीश्वरम् ॥१८४॥
मासः पक्षो दिनं वर्षं
तदहः प्रभृति प्रिये ।
संलक्ष्यैवं प्रयत्नेन
तत्काले निश्चयो भवेत् ॥१८५॥

यतो बाह्यात्कालादारभ्य सकलकालव्यवस्थोत्थापकत्वात्कालं, प्रभविष्णुतया विश्वस्याक्रमणाच्चेश्वरं, प्राणे प्रकृष्टेन निभालनात्मना यत्नेनैवमुक्तयुक्त्या निरूपयेत् परीक्षेत, ततः प्रभृति मासपक्षदिनवर्षादि सम्यग्लक्षयित्वा तत्काले निश्चयो भवेदर्थाज्जीवितस्येति संबन्धः॥

उपसंहरति

उत्तरायणजे काले
एवं ते कथितं मया ।

उत्तरायणमत्र दक्षिणनासापुटवाहः, तस्य संहारप्रधानत्वात् ॥

'स्थिरसुखमासनम्' ( पात० सू० २।४६ )

इति । ततः पूर्वोक्तं देहनाद्युच्चारान्तं[1] कृत्वा, दशधा योगमार्गेणेति बाह्याभ्यन्तररेचनादिषड्क्-प्रशान्तकुम्भक-प्रत्याहार-धारणा-ध्यानात्मना भाविना अथच भाविप्राणादिवायुदशकजयपूर्वं पूर्वोक्तं हंसस्वच्छन्दं परं निष्कलभट्टारकमभ्यसेदनुप्रविशेत् ॥

तदनुप्रवेशं पूर्वोक्तोपायानुसारेण[2] स्फुटयति

मन्त्रं बिन्दुमतीतं तु
नादान्तज्योतिराकृतिम्॥२९३॥
संकल्प्य कल्पनालक्ष्यं
ध्यायेद्वै तेन सर्वगम् ।

चतुष्कलनाथमकारादिकलोच्चारपूर्वं बिन्दुमतीतमिति तदुल्लङ्घनात् अर्धचन्द्रनिरोधिकापदमुद्धाव्य, नादनादान्तक्रमेण ज्योतिराकृतिमिति शक्त्यादिप्रकाशरूपं, संकल्प्य विकल्पपूर्वमविकल्पेनासाद्य, कल्पनाभिरलक्ष्यं स्वप्रका-

---

१ ख० ग० पु०दाहादीति पाठः ।

२ ख० पु० सारणेनेति पाठः ।

वायवी धारणाङ्गुष्ठे
आग्नेयी नाभिमध्यतः ॥२९९॥
माहेयी कण्ठदेशे तु
वारुणी घण्टिकाश्रया ।
आकाशधारणा मूर्ध्नि
सर्वसिद्धिकरी स्मृता ॥३००॥

पाददेशे तिर्यग्गतेः, नाभौ जाठराग्नेः, कण्ठे स्थितिपदे धरण्याः, घण्टिकायां रसस्य, ब्रह्मरन्ध्रे च व्योम्नः सद्भावात्तथैव धारणा उक्ताः । अत्र चोद्घाते दीक्षाप्रस्तावनिर्णीतं वर्णमण्डललाञ्छनाक्षरात्मकत्वं धारणाध्येयम् । तत्र प्रथमं कण्ठे पार्थिवीं धारणां बद्ध्वा हृदयादुद्घातपञ्चकेन पञ्चगुणं पार्थिवं तत्त्वं भिन्द्यात्, ततोऽनेनैव क्रमेण हृदयादेव चतुर्भिरुद्घातैश्चतुर्गुणमप्तत्त्वं, ततो हृदयादेव नाभिक्षेत्रे त्रिभिरुद्घातैस्त्रिगुणमग्निम्, अनन्तरं हृदयादेव द्वाभ्यां पादाङ्गुष्ठगतं द्विगुणं वायुं, ततोऽपि अङ्गुष्ठात्संकोचयुक्त्या प्राणशक्तिमूर्ध्वमुद्बोध्य हृदयादेवैकोद्घातयुक्त्या शरवद्ब्र-

'दशधा योगमार्गेण हंसस्वच्छन्दमभ्यसेत् ।' (७।२९३)
इति यदुपक्रान्तमभूत्तन्निर्वाहितम् ॥ ३२१ ॥

अथेदानीं सगर्भप्राणीयधारणाभिर्योगिनां योगोचितजाग्रदाद्यवस्था दर्शयन् दर्शनान्तरोक्तवेधसमावेशस्वरूपज्ञानं शिक्षयति

प्राणापानौ तु संयोज्य
हृस्वकोटिसमन्वितौ ।
नाभ्याधारे च योगीन्द्रः
यदा तिष्ठेत्तदास्य
स्वेदः कम्पश्च जायते ॥ ३२२ ॥

हृदये प्रशान्ताशेषतरङ्गानाहतविश्रान्त्यनन्तरं यदा मन्त्रवृद्धेरु[1]न्मिषत्ता भवति तदा, हृदि सामरस्यावस्थितौ प्राणापानौ हृस्वकोट्याकारकलाविमर्शनेन युक्तावधःप्रसरणक्रमेण नाभौ संयोज्य, प्रोक्तकालं तिष्ठतः स्वेदकम्पौ भवतः ॥ ३२२ ॥

अथासौ

पुनरेव तु हृत्स्थौ हि
प्राणापानौ निरोधयेत् ।

---

१ ख० पु० वृद्धेरुन्मिमिषिषेति पाठः ।

यदा तु

भ्रूमध्ये बिन्दुयोगेन
प्राणरोधं तु कारयेत् ।
सुषुप्तं जायते तत्र
क्षणाच्चैव प्रबुध्यते ॥ ३२५ ॥

प्लुतेनैव तालुनो भेदितत्वान्मात्राबिन्दुकलाव्याप्तिविमर्शेन भ्रूमध्ये प्रोक्तकालं तिष्ठतः प्रशान्तमनोवृत्तिः सुषुप्तावस्था उदेति, क्षणाच्च प्रबुध्यत इति न लौकिकवत् तमोवरणेन अभिभूयते । तदुक्तं

'......तदन्यत्र तु चिन्मयः ।' (स्प० ३।२)

इति ॥ ३२५ ॥

ततोऽपि

मूर्धद्वारं समाश्रित्य
निष्कलं ध्यानमारभेत् ।
एवमभ्यसतस्तस्य
प्रत्ययस्तु तदा भवेत् ॥३२६॥
पिपीलकण्टकावेधो
मूर्ध्वद्वारं विभिन्दतः ।

निष्कलमिति वर्णज्योतिर्ध्वनिव्याप्त्युल्लङ्घनात्स्पर्शनानुभवरूपं, 'पिपीलकण्टकावेध' इति संचरत्पिपीलस्पर्शतुल्यकण्टकस्पर्शतुल्यश्च स्पर्श इत्यर्थः ॥ ३२६ ॥

किंच

भित्त्वा क्रमेण सर्वाणि
उन्मन्यन्तानि यानि तु ॥३२७॥
पूर्वोक्तलक्षणैर्देवि

लक्षणैरिति प्रणवाधिकारोक्तैरनुभवैर्युज्यते इति शेषः । तावदन्तात्र तुर्यदशा ॥

अथैतत्सर्वं

त्यक्त्वा स्वच्छन्दतां व्रजेत् ।

गाढगाढोन्मनापदविश्रान्तिपदप्रकर्षात् तुर्यातीतदशालाभात् चिदानन्दघनपरभैरवसमावेशमनुभवति योगीन्द्र इत्यर्थः ॥

न केवलं देहोत्तीर्ण एव पदेऽस्य परसमावेशो घटते, यावत्

जायते उन्मनस्त्वं हि
देहेनानेन साधके ॥ ३२८ ॥

देहावस्थायां व्युत्थानेऽपि साधकस्य समावेशप्रकर्षात्तदानन्दरससंस्काराद्घूर्णमाणतैव भवतीत्यर्थः ॥ ३२८ ॥

किं चायं स्वातन्त्र्यशक्त्युन्मेषात्

संक्रामेत्परदेहेषु
क्षुत्तृष्णाभ्यां न बाध्यते ।
अतीतानागतं चैव
त्रैलोक्ये यत्प्रवर्तते ॥ ३२९ ॥
प्रत्यक्षं तद्भवेत्तस्य
सर्वज्ञत्वं च जायते ।

'यच्च प्रवर्तते' इति यदपि वर्तमानं किंचिदस्ति, तदस्य सर्वं प्रत्यक्षीभवति । 'सर्वज्ञत्वम्' इति क्रमेणाभ्यासप्रकर्षान्मन्त्रमन्त्रेशादितुल्यो भवतीत्यर्थः ॥ ३२९ ॥

पाटलिकं प्रमेयमुपसंहरन् पटलान्तरेण संगतिं दर्शयति

प्रसङ्गेऽध्यात्मकालस्य
ज्ञानं विज्ञानमेव च ॥ ३३० ॥

